# Shri Ganapati Atharvashirsha Upanishat or Ganapati Upanishat with Accents

# શ્રીગણપત્યથર્વશીર્ષોપનિષત્ ગણપત્યુપનિષત્ સસ્વર

## Document Information

Text title : Ganapati Atharvashirsha Upanishad with Vedic Accents

File name : ganapatiaccent.itx

Category : atharvashIrSha, upanishhat, svara, ganesha, veda

Location : doc_veda

Author : Vedic tradition

Transliterated by : Sunder Hattangadi and Kirk Wortman kirkwort at hotmail.com

Proofread by : Kirk Wortman, Daya Aithal, NA

Description-comments : 89 / 108; Atharva Veda - Shaiva upanishad. Mantrapushpam, Ramakrishna Mission

Latest update : December 25, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# Shri Ganapati Atharvashirsha Upanishat or Ganapati Upanishat with Accents

# શ્રીગણપત્યથર્વશીર્ષોપનિષત્ ગણપત્યુપનિષત્ સસ્વર

ગણેશાથર્વશીર્ષમ્

ॐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥
ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ॐ નમસ્તે ગણપતયે । ત્વમેવ પ્રત્યક્ષં તત્ત્વમસિ ।
ત્વમેવ કેવલં કર્તાઽસિ । ત્વમેવ કેવલં ધર્તાઽસિ । ત્વમેવ કેવલં હર્તાઽસિ ।
ત્વમેવ સર્વં ખલ્વિદં બ્રહ્માસિ । ત્વં સાક્ષાદાત્માઽસિ નિત્યમ્ ॥ ૧॥

ઋતં વચ્મિ । સત્યં વચ્મિ ॥ ૨॥

અવ ત્વં મામ્ । અવ વક્તારમ્ । અવ શ્રોતારમ્ । અવ દાતારમ્ । અવ ધાતારમ્ ।
અવાનૂચાનમવ શિષ્યમ્ । અવ પશ્ચાત્તાત્ । અવ પુરસ્તાત્ । અવોત્તરાત્તાત્ ।
અવ દક્ષિણાત્તાત્ । અવ ચોર્ધ્વાત્તાત્ । અવાધરાત્તાત્ ।
સર્વતો માં પાહિ પાહિ સમન્તાત્ ॥ ૩॥

ત્વં વાઙ્મયસ્ત્વં ચિન્મયઃ । ત્વમાનન્દમયસ્ત્વં બ્રહ્મમયઃ । ત્વં સચ્ચિદાનન્દાઽદ્વિતીયોઽસિ ।
ત્વં પ્રત્યક્ષં બ્રહ્માસિ । ત્વં જ્ઞાનમયો વિજ્ઞાનમયોઽસિ ॥ ૪॥

સર્વં જગદિદં ત્વત્તો જાયતે । સર્વં જગદિદં ત્વત્તસ્તિષ્ઠતિ ।
સર્વં જગદિદં ત્વયિ લયમેષ્યતિ । સર્વં જગદિદં ત્વયિ પ્રત્યેતિ ।
ત્વં ભૂમિરાપોઽનલોઽનિલો નભઃ । ત્વં ચત્વારિ વાક્પદાનિ ॥ ૫॥

ત્વં ગુણત્રયાતીતઃ । ત્વં અવસ્થાત્રયાતીતઃ । ત્વં દેહત્રયાતીતઃ ।

ત્વં કાલત્રયાતીતઃ । ત્વં મૂલાધારસ્થિતોઽસિ નિત્યમ્ । ત્વં શક્તિત્રયાત્મકઃ ।
ત્વાં યોગિનો ધ્યાયન્તિ નિત્યમ્ । ત્વં બ્રહ્મા ત્વં વિષ્ણુસ્ત્વં રુદ્રસ્ત્વમિન્દ્રસ્ત્વમગ્નિસ્ત્વં
વાયુસ્ત્વં સૂર્યસ્ત્વં ચન્દ્રમાસ્ત્વં બ્રહ્મ ભૂર્ભુવઃ સ્વરોમ્ ॥ ૬॥

ગણાદિં પૂર્વમુચ્ચાર્ય વર્ણાદિંસ્તદનન્તરમ્ । અનુસ્વારઃ પરતરઃ । અર્ધેન્દુલસિતમ્ ।
તારેણ ઋદ્ધમ્ । એતત્તવ મનુસ્વરૂપમ્ । ગકારઃ પૂર્વરૂપમ્ । અકારો મધ્યમરૂપમ્ ।
અનુસ્વારશ્ચાન્ત્યરૂપમ્ । બિન્દુરુત્તરરૂપમ્ । નાદઃ સન્ધાનમ્ । સ ઁ હિતા સન્ધિઃ ।
સૈષા ગણેશવિદ્યા । ગણક ઋષિઃ । નિચૃદ્ગાયત્રીચ્છન્દઃ ।
ગણપતિર્દેવતા । ૐ ગં ગણપતયે નમઃ ॥ ૭॥

એકદન્તાય વિદ્મહે વક્રતુણ્ડાય ધીમહિ । તન્નો દન્તિઃ પ્રચોદયાત્ ॥ ૮॥

એકદન્તં ચતુર્હસ્તં પાશમઙ્કુશધારિણમ્ । રદં ચ વરદં હસ્તૈર્બિભ્રાણં મૂષકધ્વજમ્ ।
રક્તં લમ્બોદરં શૂર્પકર્ણકં રક્તવાસસમ્ । રક્તગન્ધાનુલિપ્તાઙ્ગં રક્તપુષ્પૈઃ સુપૂજિતમ્ ।
ભક્તાનુકમ્પિનં દેવં જગત્કારણમચ્યુતમ્ । આવિર્ભૂતં ચ સૃષ્ટ્યાદૌ પ્રકૃતેઃ પુરુષાત્પરમ્ ।
એવં ધ્યાયતિ યો નિત્યં સ યોગી યોગિનાં વરઃ ॥ ૯॥

નમો વ્રાતપતયે । નમો ગણપતયે । નમઃ પ્રમથપતયે ।
નમસ્તેઽસ્તુ લમ્બોદરાયૈકદન્તાય વિઘ્નવિનાશિને શિવસુતાય શ્રીવરદમૂર્તયે નમઃ ॥ ૧૦॥

એતદથર્વશીર્ષં યોઽધીતે । સ બ્રહ્મભૂયાય કલ્પતે । સ સર્વવિઘ્નૈર્ન બાધ્યતે ।
સ સર્વતઃ સુખમેધતે । સ પઞ્ચમહાપાપાત્ પ્રમુચ્યતે ।
સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ । પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।
સાયં પ્રાતઃ પ્રયુઞ્જાનો પાપોઽપાપો ભવતિ । સર્વત્રાધીયાનોઽપવિઘ્નો ભવતિ ।
ધર્માર્થકામમોક્ષં ચ વિન્દતિ । ઇદમથર્વશીર્ષમશિષ્યાય ન દેયમ્ ।
યો યદિ મોહાદ્ દાસ્યતિ સ પાપીયાન્ ભવતિ ।
સહસ્રાવર્તનાદ્યં યં કામમધીતે તં તમનેન સાધયેત્ ॥ ૧૧॥

અનેન ગણપતિમભિષિઞ્ચતિ સ વાગ્મી ભવતિ ।
ચતુર્થ્યામનશ્નન્ જપતિ સ વિદ્યાવાન્ ભવતિ । ઇત્યથર્વણવાક્યમ્ ।
બ્રહ્માદ્યાવરણં વિદ્યાન્ન બિભેતિ કદાચનેતિ ॥ ૧૨॥

યો દૂર્વાઙ્કુરૈર્યજતિ સ વૈશ્રવણોપમો ભવતિ ।
યો લાજૈર્યજતિ સ યશોવાન્ ભવતિ । સ મેધાવાન્ ભવતિ ।

યો મોદકસહસ્રેણ યજતિ સ વાઞ્છિતફલમવાપ્નોતિ ।
યઃ સાજ્ય સમિદ્ભિર્યજતિ સ સર્વં લભતે સ સર્વં લભતે ॥ ૧૩॥

અષ્ટૌ બ્રાહ્મણાન્ સમ્યગ્ ગ્રાહયિત્વા સૂર્યવર્ચસ્વી ભવતિ ।
સૂર્યગ્રહે મહાનદ્યાં પ્રતિમાસન્નિધૌ વા જપ્ત્વા સિદ્ધમન્ત્રો ભવતિ ।
મહાવિઘ્નાત્ પ્રમુચ્યતે । મહાદોષાત્ પ્રમુચ્યતે । મહાપાપાત્ પ્રમુચ્યતે ।
મહાપ્રત્યવાયાત્ પ્રમુચ્યતે । સ સર્વવિદ્ભવતિ સ સર્વવિદ્ભવતિ ।
ય એવં વેદ । ઇત્યુપનિષત્ ॥ ૧૪॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ ।
સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded by Sunder Hattangadi with Vedic accents (Svaras.)
The accents and re-proofreading by Kirk Wortman, Daya Aithal, NA

*Shri Ganapati Atharvashirsha Upanishat or Ganapati Upanishat with Accents*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*